# आचार्येण सह अभिमुखभाषणम् ।

छात्राः – नमस्ते।

आचार्यः – नमस्ते। आगच्छन्तु, उपविशन्तु।

राजुः – वयं समीपस्थस्य सर्वकारविद्यालयस्य छात्राः। केरलीयकलाम् अधिकृत्य ज्ञातुम् इच्छामः।

आचार्यः – केरलेषु बह्व्यः कलाः सन्ति। तासु प्रसिद्धाः भवन्ति कथाकेलिः, कूटियाट्टम्, मोहिनियाट्टम्, पाठकम्, चाक्यार्कूत्त् इत्यादीनि।

विष्णुः – कूटिनाट्टम् तत् नाम किम्?

आचार्यः – सा एका केरलीयकला।

विष्णुः – अद्यापि प्रचलति वा?

आचार्यः –अस्ति एव। इरिङ्ङालक्कुटायां चाच्चुचाक्यारः, परमेस्वरचाक्यारः, माधवचाक्यारः, पैङ्कुलदेशे रामचाक्यारः , माणिमाधवचाक्यारः, मूषिक्कुलं कोच्चुकुट्टन् चाक्यारादयः पूर्विकाचार्याः। पुरातनकाले केवलं देवालयेषु एव आसीत् अस्य कलारूपस्य प्रवर्तनम्। इदानीम् अन्यत्र सर्वत्रापि प्रचलन्ति। इदानीं परिशीलनकेन्द्राणि अन्यान्यपि सन्ति।

राजुः – कुत्र वर्तते?

आचार्यः– कलामण्डले, सर्वकलाशालायाम्, अनन्तपुर्यां मार्गी नामके कलाकेन्द्रे, चाच्चुचाक्यार् पठनकेन्द्रे च वर्तन्ते।

राजुः – कूटियाट्टे उपयुज्यमानानि वाद्योपकरणानि कानि?

आचार्यः – मिषाव्, इटक्का, कुषित्तालम्, शङ्खः च भवन्ति।

रघुः – प्रधानवाद्योपकरणं किम्?

आचार्यः – मिषाव् भवति।

वीणा – कूटियाट्टमधिकृत्य पुनरपि ज्ञातुमिच्छामि।

आचार्यः कलायामस्यां चत्वारः अभिनयप्रकाराः सन्ति। आङ्गिकं, वाचिकम्, आहार्यं, सात्विकं चेति। कूटियाट्टस्य प्राधान्यं विज्ञाय युनस्को संस्थया अङ्गीकृतः च। अतः एव अस्याः प्रचारणार्थं कूटियाट्टं केन्द्रं तिरुवनन्तपुरं, सङ्गीतनाटक– अक्कादमी– दिल्ली च प्रयतेते।

राजुः – कथाकेल्याः कूटियाट्टस्य च भेदः कः?

आचार्यः– कूटियाट्टे सर्वाः अभिनयरीतयः सन्ति। कथाकेल्यां तु न तथा। तत्र वाचिकाभिनयस्य अधिकप्राधान्यं न दृश्यते। अपि च कथापात्राणां वेषविधाने सौन्दर्याधिक्यमप्यस्ति।

रघुः – धन्यवादः। गच्छामः।

आचार्यः– शुभमस्तु।